# <u>भाषाणां वर्गीकरणम् (Classification of Languages)-</u>

सम्प्रति संसारेऽस्मिन् त्रिसहस्र (3000) भाषाः प्रचलन्ति। एताषां सर्वासाम् भाषाणां द्विधा वर्गीकरणं कृतमस्ति भाषा विद्भिः -

(1) आकृतिमूलकं वर्गीकरणम्,

(2) पारिवारिकम् वर्गीकरणञ्च।

(1) **<u>आकृतिमूलकं वर्गीकरणम्</u>**- वर्गीकरणस्यास्याधारः सम्बन्धतत्त्वमस्ति। प्रो. देवेन्द्रनाथ शर्मा महोदयेन आकृतिमूलकं वर्गीकरणमेव रूपात्मकं वर्गीकरणमिति स्वीकृतम्। वर्गीकरणे ऽस्मिन् वाक्यानां पदानाञ्च अध्ययनं क्रियते। एतदनुसारेणात्र वर्गद्वयम् उपलभ्येते - (क) अयोगात्मिकाः – भाषाः (ख) योगात्मिकाः भाषाश्च योगात्मिके भाषासंवर्गे पुनस्त्रि विधाः उपवर्गाः सन्ति-

a. अश्लिष्टाः b. श्लिष्टाः, c. प्रश्लिष्टाश्च।

अश्लिष्टयोगात्मकं पुनः चतुर्षु विभागेषु विभक्तमस्ति-

1. पूर्वयोगात्मकम् (Prefix Agglutinative).

2. मध्ययोगात्मकम् (Infix Agglutinative), 3. अन्तयोगात्मकम् (Suffix Agglutinative),

4. पूर्वान्तयोगात्मकञ्च (Prefix-suffix Agglutinative).

अन्तर्मुखीश्लिष्टयोगात्मकं वहिर्मुखीश्लिष्टयोगात्मकम् इति भेदेन श्लिष्टयोगात्मकं तु द्विविधं भवति। तत्र अन्तर्मुखीपक्षे संयोगात्मकं अरबी भाषा, वियोगात्मकं हिब्रूभाषा इत्यादयः सन्ति। वहिर्मुखीपक्षे तु संयोगात्मकं संस्कृतभाषा, वियोगात्मकं हिन्दीभाषा चास्ति।

प्रश्लिष्टयोगात्मकभाषायां द्विविधः विभागः दृश्यते। प्रथमं तु पूर्णप्रश्लिष्टयोगात्मकं यथा चेरोफीभाषा। द्वितीयम् आंशिकप्रश्लिष्टयोगात्मकं यथा बास्कभाषा।

आकृतिमूलकं वर्गीकरणं बहुविधमालोचितं विद्वद्भिः,

यथा प्रस्तूयतेऽत्र-

(i) जगतः त्रिसहस्रभाषाणां त्रिषु चतुर्षु वा वर्गेषु समायोजनं

समीचीनं नास्ति।

(ii) वर्गीकरणेऽस्मिन् भाषाणां रचना, प्राचीनता, भौगोलिक स्थित्यादिकाः विषयाः विवादास्पदाः सन्ति।

(iii) वर्गीकरणेऽस्मिन् भाषाणां केवलं बाह्यपक्षमेव

निरूपितमिति ।

(iv) आकृतिमूलकस्य वर्गीकरणस्य व्यावहारिक्युपयोगिता नास्त्येव ।

जगति एतादृश्यपि भाषाः अवलोक्यन्ते, यासां आकृतिमूलकवर्गीकरणस्य कस्मिंश्चिदपि वर्गे समावेशः भवितुं न शक्नोति ।

(vi) वर्गीकरणप्रक्रियायां काचन् असम्बद्धभाषाणामपि एकस्मिन्नेव वर्गे सन्निवेशः प्राप्यते ।

(vii) वर्गीकरणस्यास्य कापि भाषा कस्यापि वर्गस्य प्रतिनिधिः भाषा नास्ति ।

(viii) एकस्य वर्गस्य भाषयिकलक्षणाः अन्यवर्गीयाः भाषासु संक्रमिताः सन्ति । (ix) अनेन वर्गीकरणेन भाषाणां विकासक्रमो नहि ज्ञातुं शक्यते ।

इत्थम् सुस्पष्टमिदं यत् जगतः बहुविधभाषाणाम् अध्यय नाय भाषावैज्ञानिकाः यद् आकृतिमूलकं वर्गीकरणमकार्षुः तस्मिन् बहवः दोषाः सन्ति । अत एव वैज्ञानिक दृष्ट्यभावादेव भाषाविज्ञानविदः तवर्गीकरणं तत्यजुः ।

**(2) <u>पारिवारिकं वर्गीकरणम्</u> –** भाषायाः पारिवारिक वर्गीकरणमतीव वैज्ञानिकमस्ति । वर्गीकरणेऽस्मिन् रचनातत्त्वम् अर्थतत्त्वञ्च समानरूपेण आलोच्येते । ध्वनिः, पदरचना, वाक्यसंरचना, अर्थः, शब्दसम्पत्तिः स्थानसान्निध्यं च एतेषु षट्सु विषयेषु साम्ये सति भाषाणाम् एकः परिवारः भवति ।

डॉ. देवेन्द्रनाथशर्मा महोदयः वर्गीकरणेऽस्मिन् अष्टादश -भाषापरिवाराणां नामानि निर्दिशति-

1. भारोपीय- (भारत-यूरोपीय) परिवारः

(Indo-European Family)

2. द्राविड़-परिवारः (Dravidian Family )

3. बुरुशस्की परिवारः (Burushaski Family) 4. काकेशी- परिवारः ( Caucasian Family )

5. यूराल अल्टाई परिवारः (Ural-Altai Family )

6. चीनी-परिवारः (Chinese Family) 7. जापानी- कोरियाई परिवारः

(Japanese-Korean Family)

8. अत्युत्तरी (हाइपरबोरी) परिवारः

(Hyperborean Family) 9. बास्क परिवारः (Basqu Family)

10. सामी हामी परिवार: (Semitic Hamitic Family)

11. सूडानी परिवारः (Sudan Family )

12. वान्तू-परिवारः (Bantu Family)

13. होतेन्तोत बुशमैनी परिवारः (Hotentot-Bushman Family)

14. मलय- पोलिनेशियाई परिवारः (Malay-Polynasian Family)

15. पापुई परिवारः (Papuan Family) 16. आस्ट्रेलियन परिवारः (Australian Family)

17. द.पू. एशियाई परिवारः (Austro Asiatic Family ) 18. अमरीकी- परिवारः ( American Family)

-- By Sanjoy Barman